श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

श्री अष्टभुजाष्टकम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि॥

गजेन्द्र रक्षा त्वरितम् भवन्तं
ग्राहैर् इवाहं विषयैर् विकृष्टः।
अपार विज्ञान दयानुभावम्
आप्तं सतां अष्ट भुजं प्रपद्ये॥१

त्वदेक शेषोऽहं अनात्म तन्त्रः
त्वत् पाद लिप्सां दिशता त्वयैव।
असत् समोऽप्यष्टभुजा खिलेश
सत्ताम् इदानीम् उपलम्भितोऽस्मि॥२

स्वरूप रूपास्त्र विभूषणाद्यैः
परत्व चिन्तां त्वयि दुर्निवाराम्।
भोगे मृदूपक्रमताम् अभीप्सन्
शीलादिभिर् वारयसीव पुंसाम्॥३

शक्तिं शरण्यान्तर शब्द भाजां
सारं च सम्तोल्य फलान्तराणाम्।
त्वद्दास्य हेतोस् त्वयि निर्विशङ्कं
न्यस्तात्मनां नाथ बिभर्षि भारम्॥४

अभीति हेतोर् अनुवर्तनीयं

नाथ त्वदन्यं न विभावयामि ।
भयं कुतः स्यात् त्वयि सानुकम्पे
रक्षा कुतः स्यात् त्वयि जात रोषे ॥५

त्वदेक तन्त्रं कमला सहाय
स्वेनैव मां रक्षितुम् अर्हसि त्वम् ।
त्वयि प्रवृत्ते मम किं प्रयासैः
त्वयि अप्रवृत्ते मम किं प्रयासैः ॥६

समाधि भङ्गेष्वपि संपतत्सु
शरण्य भूते त्वयि बध्दकक्ष्ये ।
अपत्रपे सोढुम् अकिञ्चनोऽहं
दूराधिरोहं पतनं च नाथ ॥७

प्राप्ताभिलाषं त्वदनुग्रहान् मां
पद्मा निषेव्ये तव पाद पद्मे ।
आ देह पातात् अपराध दूरम्
आत्मान्त कैङ्कर्य रसं विधेयाः८

प्रपन्न जन पाथेयं प्रपित्सूनां रसायनम्
श्रेयसे जगतामेतत् श्रीमद् अष्टभुजाष्टकम् ९

शरणागत सन्त्राण त्वरा द्विगुण बाहुना ।
हरिणा वेङ्कटेशीया स्तुतिः स्वीक्रियताम् इयम् १०

कवितार्किक सिंहाय कल्याण गुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः

---

Please send your comments and suggestions to R.Venkat